# स्वप्नवासवदत्तम् - प्रथमोऽङ्कः

पूर्वं त्वयाप्यभिमतं गतमेवमासी-
च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्त्तुः।
कालक्रमेण जगतः परिवर्त्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ॥४॥

- महाकविभासविरचितस्य स्वप्नवासवदत्तमिति नाटकस्य प्रथमांकेलभ्यते अयं श्लोकः।

- मगधराजस्य दर्शकस्य भगिन्याः पद्मावत्याः आगमनमुद्दिश्य तपोवने भट्टैः तापमानाम् उत्सारणाकाले वासवदत्ता उत्सारिता सती नितराम् आत्मानिम् अपमानिताम् अमन्यत। तदा अभितां तां मन्त्री यौगन्धरायणः प्रबोधयनाह श्लोकेऽस्मिन् पूर्वमिति।

- पूर्वं पूर्वस्मिन काले यदा त्वं राज्ञी आसीः तदा त्वया अपि भवत्या अपि एवं गतम् एतादृशं गमनं भट्टकर्त्तृकोसारण पूर्वकम् अभिमतम् अभीष्टम् आसीत् अभवत्। पुनः भर्त्तुः तत्रभवतः उदयनस्य विजयेण स्वराज्यप्राप्तिरुपजयेन श्लाघ्यं परिजनोपेतं यथा तथा सविलासं गमिष्यसि तदेव सामान्येन समर्थयति जगतः लोकस्य भाग्यपङ्क्तिः दैवविहिता दुःखसुखश्रेणिः कालक्रमेण अनुकूलप्रति-कूल समयानुसारेण चक्रार पङ्क्तिः चक्रस्य तराणां दन्डानां पङ्क्तिः इव परिवर्तमाना भ्रमन्ती गच्छति, क्वचिद् उच्चै गच्छति क्वचिद् नीचैरागच्छति। अतः चक्रनेमिक्रमेन मानवानाम् उन्नतेर-वनतेश्च अनियतत्वं बोध्यम् इतिभावः।

- अस्मिन् श्लोके उपमानाम् अर्थालङ्कारः वसन्ततिलकम् च वृत्तम्।